Shodhshauryam, International Scientific Refereed Research Journal
© 2018 SISRRJ | Volume 1 | Issue 3 | ISSN : 2581- 6306

# यौतकप्रथायाः ऐतिहासिकपृष्ठभूमिः



लक्ष्मीनारायण जेना
शोधच्छात्रः, शिक्षाशास्त्रम्
राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः,भारतम्।

**शोधसारः** – यौतकप्रथायाः प्रचलनं न साम्प्रतिकमपितु प्राचीनम् । साम्प्रतिकयुगे व्याधीरूपेण समाजे सर्वत्र दरीदृश्यते । इदनीन्तन जनाः यौतकप्रथायाः प्रचलनकारणानवज्ञानात् अस्याः अर्थान्तरे प्रयोगः तथैव तेन समाजे अतीव दुष्करास्थितिः जाता वर्तते । अतः पत्रेऽस्मिन् यौतकप्रथायाः ऐतिह्यं ज्ञातुमत्र केषाञ्चनविषयाणां प्रस्तावः कृतो वर्तते ।

**मुख्यशब्दः** – यौतकप्रथा, समाजः,ऐतिहासिकः, नारीपात्रं, वेदकालः, पुरूषः।

**उपोद्घातः** – यौतकप्रथायाः विषये स्पष्टतया ज्ञातव्यं चेत् अस्माभिः वेदकालादारभ्य नारीणां पात्रं, कुटुम्बजीवनं, तत्कालिकसमाजस्य विषये चिन्तनीयम् । अत इदानीं वेदकाले नारीणां स्थितिः, पात्रम् इत्यादीनां विषये चिन्त्यते ।

**"यस्य निःश्वसितमेतत् ऋग्वेदो यजुर्वेदो..."** इति उपनिषद्वाक्यात् ज्ञायते यत् ईश्वरात् वेदाः आविर्बभूवुः इति । ये च तादृशाम्नायस्य तेषां तपः शक्त्या साक्षात्कृतवन्तः ते ऋषयः भवन्ति । तदेव यास्केनापि उक्तं यत् "साक्षात्कृतधार्माण ऋषयो बभूवुः" इति । न केवलं साक्षात्कृतवन्तः ते, अपि तु वेदोक्तं जीवनं यापयन्तः जीवनस्य साफल्यम् अभजन् । वेदो नाम धर्मः । स च जीवनधर्मः । अत एव वेदकालिकं समाजं पश्यामः चेत् तदा जनाः वर्णधर्मेण आश्रमधर्मेण च विभक्ताः आसन् । तेषां चरमलक्ष्यं तु मोक्षः । तत्प्राप्तौ धर्मादयः पुरुर्षार्थाः वेदबोधिताः सहकुर्वन्ति इत्यतः तन्मार्गपराः बभूवुः ते । न केवलं पुरूषाः ऋषयः अपि तु ऋषिकाः ब्रह्मवादिन्यः ब्रह्मान्वेषणपराः आसन् इति उपनिषदामध्ययनद्वारा विज्ञायते ।

### ऋग्वेदकाले नारीणां स्थानम्

वेदेषु सर्वप्रथमः ऋग्वेदः अतिप्राचीनः इति उच्यते । ऋग्वेदस्य कालः १५००-१००० BC इति इतिहासकारैः सूच्यते । ऋग्वेदकालिके समाजे नारीणां स्थानम् अत्यन्तम् उत्कृष्टम् आसीत् । प्राचीने ग्रीस् (Greece), इटली (Italy) इत्यादी समकालिकसमाजापेक्षया ऋग्वेदकालस्य नार्यः उत्कृष्टे स्थाने विराजमानाः आसन् इति अवगम्यते । बह्व्यः नार्यः शास्त्रेषु प्राविण्यं सम्पाद्य शास्त्रगोष्ठीषु अग्रगामिन्यः आसन् इति ज्ञायते । विश्ववारा, घोशाला , अपलादयः विदुष्यः अवर्तन्त इति ज्ञायते । शौनकः स्वस्य ब्रह्मदेवता इत्यस्मिन् सप्तविंशतिः ब्रह्मवादिनीनां विदुषां नामानि उल्लिखन् तासां ऋग्वेदीयसूक्तेषु योगदानं वर्णयति । महिलाः प्राप्ते वयसि विवाहं कुर्वत्यः यागादिकर्मसु भागं गृह्णन्ति स्म । वराणां चयने तासां स्वातन्त्र्यम् आसीत् इति ज्ञायते । ऋग्वेदकाले बहुपत्नीत्वं नैव आसीत् । धर्मशास्त्रेषु महिलाः शूद्रेभ्यो निःसन्देहं समानाः आसन् इति उच्यते । गीतायामपि महिलाः, वैश्याः, शूद्राः एकस्मिन् एव वर्गे अन्तर्भवन्ति इति वर्णनां कृत्वा पापयोनित्वेन वर्णिताः ।

तस्मिन् काले स्ववृत्त्या जनाः ब्राह्मणादिवर्णेषु वर्गीकृताः । काले गते सति सर्ववर्णेषु महिलाः शूद्रसमानवत् दृष्टाः । महिलानां विषये तावत् प्रामुख्यं नैव दृश्यते । यद्यपि ताः उत्तमजीवनं यापयन्त्यः वेदोक्तं मार्गम् अनुसरन्त्यः चेदपि तासां विषये गौरवभावः ह्रासतां गतः ।

**बौद्धकाले नारीणां स्थितिः**

गौतमबुद्धस्य काले भिक्कुनीनां सङ्घस्य स्थापनम् अभवत् । तत्रादौ गौतमः विरोधं प्रकटयन् एव अनन्तरं सः भिक्षुकेभ्यो भिक्कुनीभिः सह सम्बन्धो न कल्पनीयः इति आदिष्टवान् । यदि ताभिः व्यवहारः करणीयः चेत् ताः मातृभावेन, सहोदरीभावेन, पुत्रीत्वेन व्यवहारः करणीयः। आरम्भे तावत् सङ्घे भिक्कुनीनां समावेशात् अनेके विभिन्नाः अभिप्रायाः आगताः यथा ताः निम्नस्तरीयाः, तासां संघे समावेशे कृते संघस्य समाजे गौरवः नश्यति इति । पुनश्च ताः बौद्धिकशक्त्या नैतिकदृष्ट्या च असमर्थाः इति बहवो आरोपाः आनन्देन बुद्धस्य पुरस्तात् कृताः। आनन्दस्य आरोपे कठोरतां विज्ञाय बुद्धः अवदत् यत् – महिलाः सर्वसमर्थाः तत्त्वानामाचरणे संयमादिषु अनुशासनेषु विषयेषु इति कथयन् तस्य आरोपान् निराकृतवान् । महिलाः पुरूषापेक्षया अपि श्रेष्ठाः इत्यपि नार्थः । गौतमस्य विवक्षा इयमासीत् यत् तासाम् उच्चनीचभावेन दर्शनापेक्षया गौणीभावेन दर्शनम् इति ।

पुराकाले भारतवर्षे पुत्रीत्वेन जन्म भवति चेत् तदेकं विपद् अथवा उपद्रवमिति भावः अवर्तत । किन्तु, गौतमः एतादृशभावः न भवेत् परं तासां विषये गौरवभावः. ताः अपि समर्थाः विद्यन्ते इति गौतमस्य जीवनद्वारा ज्ञायते ।

**मनोः काले नारीणां स्थितिः**

मनुः गौतमबुद्धस्य अनन्तरं जन्म अलभत । सः मनुस्मृतिम् अलिखत् । स च समाजस्य धर्मः आसीत् । न केवलं समाजस्य अपि तु देशस्यैव धर्मः अवर्तत । तस्मिन् काले ब्राह्मणाः संन्यासाश्रमात् महिलाः बहिष्कृतवन्तः । अनेन वयम् अवगन्तुं शक्नुमः यत् कथं बुद्धस्य कालात् समाजे महिलानां विषये गौरवः न्यूनो जातः इति ।

मनुः वदति यत् महिलानां वेदाध्ययने अधिकारः नैवासीत् । अत एव तासां संस्कारः अपि वेदमन्त्रान् विनैव क्रियते स्म । तासां धर्मस्य ज्ञानं नैवासीत् यतो हि तासां वेदाध्ययने नाधिकारः । वेदमन्त्राणाम् उच्चारणेन पापक्षयः भवति । ताः वितथताः इत्यतः वेदोच्चारणं निषिद्धम् आसीत् । मनुः धर्मसूत्रेषु पुराकृतेषु विद्यमानम् एव प्रस्तुतीकरणम् अकरोत् । इदमेव तस्य उद्देश्यम् । एतादृशी नारीविषयिणी भावना अपमानकरी पीडाकरी च भारतवर्षस्य महिलाभ्यः । समर्थनं विना महिलायाः ज्ञाने वेदाधिकारे च प्रतिषेध्यं न शोभावहम् । पुनश्चैतत् तस्याः जन्मतः एव प्राप्तेः अस्ति अध्ययने अधिकारः । मोक्षप्राप्तौ अपि सा अशुद्धा असत्या इति निर्णीतमिव भवेत्। येन तस्याः संन्यासेऽपि अधिकारः नश्येत् । न केवलमेतत् अपि तु स्वात्मनः ज्ञातुमपि तस्याः अधिकारः सामर्थ्यं नास्ति इति साधितं भवति । तत्कालिकाः ब्राह्मणाः सर्वथा महिलाभ्यः अध्यात्ममार्गतः दूरे एव स्थापितवन्तः ।

एतत् तु महिलानां विषये कार्यमेव । "मैक्समुल्लर्" महाभागः कथयति यत् मानवः "दैवात् यावद् दूरे भवति चेदपि भूमौ मानवस्यापेक्षया दैवसदृशं नान्यदस्ति" इति । यदि एतत् सत्यं किमर्थमसत्यं महिलाभ्यः ? महिलाभ्यः पारिव्राज्यं निराकर्तुं ब्राह्मणानां सविधे उत्तरमेव नास्ति । किन्तु गौतमबुद्धः ज्ञाने अध्यात्ममार्गे च सर्वाधिकारं प्रदत्तवान् । एतत् तु क्रान्तिः स्वातन्त्र्यं च भारतीयमहिलाभ्यः ।

प्राचीने भारतवर्षे महिलाः अत्यादरेण गौरवभावेन दृष्टाः । तादृशी स्थितिः न कुत्रापि आसीत् समग्रे विश्वे । तादृशीगरिमा अविद्या अविद्यत महिलानां विषये । किमर्थं महिलानां विषयिणी भावना न्यूनतां गता इति चेत् तत्रोच्यते मनोः बहवो निर्बन्धाः

स्मृतौ प्रतिपादिताः। इत्थम् इदमेव तासां स्थितेः अधःपतने प्रमुखं कारणमभवत्। तत्र मनुस्मृतौ महिलानां विषये बह्व्यः मर्यादाः सूचिताः ताः इदानीं प्रदर्श्यन्ते।

- अहर्निशं महिला कुटुम्बस्य कस्यचित् पुरूषस्य नियन्त्रणे भवितव्या । तासाम् इन्द्रियसुखमपि कस्यचित् नियन्त्रणे एव भवितव्यम्।
- सा तस्याः बाल्यकाले पित्रा रक्षिता भवति, यौवने पतिना रक्षिता भवति; वृद्धाप्यस्याः पुत्रेभ्यो रक्षिता भवति। इत्थं तस्याः स्वातन्त्र्यमेव नास्ति।
- महिलाः सबलाः भवेयुः । यदि ताः दुर्बलाः मनसा शरीरेण तर्हि ताः दुःखजनकाः कुटुम्बस्य इति कृत्वा ताः सम्यक् न रक्षायोग्याः भवन्ति स्म।
- एतादृशं दौर्बल्यं सर्वजातिषु अपि आसीत्। दुर्बलः पतिः स्वपत्न्याः रक्षणं कर्तुं याचयति।
- बालिकया युवत्या वृद्धया वा न केनापि स्वातन्त्र्येण करणीयम्। तस्याः स्वगृहेऽपि।
- सा च महिला पितरं, पतिं, पुत्रान् विना न जीवितुम् इच्छेत्। यदि तथा जिजीविषा अस्ति तर्हि तिरस्कारयोग्या भवति इति। पुनश्च विच्छेदनं दातुमपि अधिकारः नैव अविद्यत।
- यदि विवाहो भविष्यति तर्हि विच्छेदनस्य चिन्तनमपि नास्ति। पतिः स्वपत्न्या सह एव भवेत्। यतो हि मनोः चिन्तनानुसारं विवाहसंस्कारः पवित्रः इत्यतः विच्छेदनं निषिद्धम् आसीत्। इदं तु नैजात् दूरे एव अविद्यत। अत्र पुरुषस्य पत्न्या बन्धः इति नार्थः, परं पत्न्याः पुरूषेण सः निबन्धनमिति। किन्तु पुरूषः तु स्वतन्त्रः। मनोः केचन नियमाः धर्माचरिताः नासन्। यथा महिलायाः स्वातन्त्र्यं नासीत्, यदि सा विधवा भवति तर्हि तस्याः वैधव्यं धनं पत्युः अधिकारे भवति। तस्मिन् धने सर्वथा महिलानां अधिकारः निषिद्धः आसीत्। वेदाध्ययने, ज्ञानप्राप्तौ तस्याः अधिकारः निराकृतः। वेदोक्तानि नित्यानि कर्माणि यदि वा आचरति तर्हि सा नरकमेव याति इति।

तस्मिन् काले मनुस्मृतिः सर्वादरः प्रायः आवर्तत। देशे सर्वत्रापि पुरूषाः मनोः स्मृतिनियमान् एव पालयन्ति स्म। अत एव तस्याः तादृशी दुरवस्था जाता। शिक्षणे, सम्पदि च नाधिकारः। सा तु गृहे, गृहीये, पाकसज्जीकरणे, पत्युः कुटुम्बसदस्येभ्यो भोजनप्रदाने, पुत्रस्य पुत्र्याः सन्ताने केवलं तस्याः दायित्वम्।

**पुराणकाले नार्यास्स्थितिः**

पुराणकालः महिलानां स्थितिविषये तासां कार्यस्य, स्वातन्त्र्यस्य विषयके परिवर्तने साक्षी भवति। पुरूषाणां प्राबल्यं महिलानां च पुरूषपराधीनता इत्यादीनि न्यूनानि अभूवन्। वेदकालीनमहिलानां स्वातन्त्र्यं पुराणकाले नष्टमभवत्। महिला सम्पूर्णतया पुरूषाश्रिता अभवत्। विवाहसंस्कारस्य महत्त्वं नष्टम्। महिलानां पाकशालायां पुत्रसन्ताने च केवलं प्राधान्यम् आसीत्। पुत्री स्वागतीकृता। महिलायाः स्वातन्त्र्यं नष्टमभवत्। पुत्रसन्ताने बहु नैर्भर्यमासीत्। विवाहसंस्कारः केवलं नाम्ना अविद्यत। महिलायाः विवाहे निर्णयस्वीकारे न किमपि स्वातन्त्र्यम् आसीत्।

रामायण-महाभारतादिषु महिलायाः पुरूषस्य कार्येऽपि भागः आसीत्। महिला स्वप्रीत्या पत्युः समालोचने भागं गृह्णाति स्म। यथा सीता द्रौपदी च स्वपत्युः वनवासे सहकारं दत्तवत्यौ। वैदिककर्मसु अपि महिलानां प्रामुख्यमासीत्। ताः भागमपि स्वीकुर्वन्ति स्म। तत्काले महिलानां स्थानम् अत्यन्तमुत्कृष्टं श्रेष्ठं च आसीत्। सीतायाः द्रौपद्याः स्वयंवरः एव महिलानां श्रैष्ठ्यस्य

द्योतकम् । विवाहकाले कन्यादानमिति अत्यन्तं गौरवपूर्णः विषयः । तच्च पितुः योग्यतां प्रदर्शयति । पुनश्च स्वपुत्र्याः कृते उत्तमवरस्य अन्वेषणम् इति दायित्वं सूचयति इति वाल्मीकिरामायणे श्रूयते । इत्थं महिलानां स्थितिः उत्कृष्टा आसीत् ।

वानरेषु विधवानां पुनर्विवाहमपि द्रष्टुं शक्नुमः । यथा वालेः मरणानन्तरं सुग्रीवः तारां वालेः पत्नीं वरयति इति ।

**मौर्याणां काले महिलानां स्थितिः**

मौर्याणां काले महिलानां स्थितिः अत्यन्तं महत्त्वपूर्णा आसीत् । महिला तु पुरूषस्य अधीने अवर्तत । कौटिल्यस्य अर्थशास्त्रानुसारम् एतत् अवगम्यते यत् अष्टविधविवाहाः अपि अनुमताः । ब्राह्मविवाहे पित्रा यौतुकदानं उपहारप्रदानं च अनुमतम् ।आर्षे विवाहे वरस्य पितरः वधोः पितुः कृते गोदानं कुर्वन्ति स्म । आसुरे विवाहे कन्यायाः पिता यत्किञ्चित् सम्पद् रूपेण प्राप्नोति स्म वरस्य पक्षतः ।

अस्मिन् काले विधवानां पुनर्विवाहः अपि श्वशुरस्य अनुमतेः अनन्तरं भवति स्म । इत्थं महिलानां स्थितिः आसीत् मौर्याणां काले ।

**मुगलकाले महिलानां स्थितिः**

मुगलराजानां कालेऽपि महिलाः पुरूषाणामधीने आसन् । प्रो.अश्रत् महाभागस्य चिन्तनानुसारं महिलानां कार्याणि स्थितिः च पुरूषाधीनताम् एव आसीत् । जीवनस्य प्रतिस्तरम् अपि पुरूषाधीनता एव दृष्टा इति । राजपूतानां कुले तु बालिकाः यवनकाले एव मारयन्ति स्म । काले गते सति महिलाः स्वातन्त्र्यं प्राप्य गृहीयकार्याणां निर्वहणे समर्थाः अभूवन् । सम्बन्धिभिः प्रतिवेशिभिः च महिलाः अत्यादरं सगौरवं दृष्टाः । मातृस्थाने विद्यमानाः महिलाः विशेषेण रजपूतानां कुले सगौरवम् आदृताः । तादृशानां मातॄणां वचः अनुलङ्घ्य व्यवहारं कुर्वन्ति स्म । एतदपि श्रूयते यत् राजपूतानां राज्ञः मातृभिः सह विना समालोचनं किमपि न कुर्वन्ति स्म इति । उदाहरणार्थत्वेन वक्तव्यं चेत् मेवारप्रान्तस्य राजा राणासंग्रामसिंहः सर्वदापि मातरम् अभिवन्द्यैव आहारं स्वीकरोति स्म इति । यवनाः अपि मातृणां विषये श्रद्धालवः आसन् इति ज्ञायते।

मुगलजनानाम् आगमनात् अनन्तरम् अनुक्षणं परिवर्तनं नाम ‘‘पर्दा’’ व्यवस्थायाः परिचयः । अर्थात् स्वात्मनः (महिलायाः ) पिदधानम् इति (अन्ये यथा न पश्येयुः तथा) । इयं व्यवस्था न केवलं मुस्लिमजनानां समुदाये अपि तु हैन्दवाः अपि महिलाः एतस्य अनुसरणं कुर्वत्यः आसन् । एतत् सामान्यम् आसीत् । विशेषेण उच्चस्तरीयेषु कुटुम्बेषु एतस्य अनुसरणं भवति स्म । किन्तु निम्नस्तरीयेषु कुटुम्बेषु महिलानां कृते अनुकरणं कर्तुं कष्टमासीत् । काले गते इयं व्यवस्था गौरवविषयीभूतः अभवत् ।

अनन्तरकाले उच्चस्तरीयेषु कुलेषु यत्र मुस्लिमजनानां प्रभावः आसीत्, तत्र विशेषेण देहली, उत्तरप्रदेशः, राजस्थाने, बिहारे, पश्चिमवङ्गप्रदेशेषु महिलाः एकान्तवासे भवितुम् इच्छुकाः अभवन् । मुगलराजानां काले बालिकाः तासां धर्मग्रन्थस्य अध्ययनं कुर्वत्यः आसन् । वयसि प्राप्ते तासाम् अध्ययनमपि स्थगितं भवति स्म । मुगलराजानाम् अकबरेण अध्ययनं कर्तुं प्रत्येकं प्रकोष्ठस्य अपि व्यवस्था कृता आसीत् । बाबरस्य पुत्री गुलबदन् वेगम् हुमायून् नाम इति ग्रन्थं लिखितवती । एवं सलीमा सुल्ताना, नूर् जहान् इत्यादयः महिलाः पर्षिया अरेबिक् सम्बन्धितसाहित्येषु कृतभूरिपरिश्रमाः आसन् । मुगल्काले एव हैन्दवाः मध्यस्तरीयाः यदि तेषां पत्न्याः मृताः भवन्ति तर्हि द्वितीयवारमपि विवाहं कुर्वन्ति स्म । मुस्लिम् जनानां धर्मग्रन्थस्य ‘‘कुरान्’’ अनुसारं चतस्रः पत्न्यः अपि भवितुं शक्यते स्म ।

**ब्रिटीश् जनानां काले महिलानां स्थितिः**

ब्रिटीष् जानानां काले भारतीयमहिलानां स्थितिः न तावत् समाधानकरी आसीत् । ब्रिटीश् जनाः हिन्दु-मुस्लिम् जनानां जीवनधर्मेषु सामाजिकस्थितिषु हस्तक्षेपं कर्तुं न इष्टवन्तः । तेषां च उद्देश्यमासीत् भारतस्य शासनं करणीयमिति । न तु स्वीयनियमानाम् उल्लंघनम् । पुनश्च काले तस्मिन् जनाः मनुस्मृत्युक्तं धर्मं पालयन्तः आसन् । मनुस्मृतेः अनुसारं चत्वारो वर्णाः यथा ब्राह्मणः, क्षत्रियः, वैश्यः शूद्रश्चेति । मनुस्मृतेः अनुसारम् इमे वर्णाः जनानां कार्यस्य कर्मणः आधारेण कृताः । भारतीयमहिलानां स्थितिः शूद्रसमाना आसीत् । प्रत्येकं भारतीयमहिलाः शूद्रवत् दृष्टाः । ताः च शिक्षणात् गृहीयसम्पदः च नष्टाः आसन् । इत्थं महिलानां प्रगतिः नैव दृष्टाः । कुटुम्बसदस्यानां सेवा, पुत्रस्य पुत्र्याः वा सन्तानोत्पत्तिः केवलं कार्यम् आसीत् । अतः तासां जीवने उन्नतिः नैव दृष्टा । न केवलं ब्रिटीश् काले अपि तु पूर्वमेव बाल्यविवाहः, सतीप्रथा इत्यादयः सामाजिका व्याधयः दुर्बलीकृताः । आल्टेकरमहाभागस्य कथनात् अवगम्यते यत् अधिकारशाहीवातावरणे संवर्धिताः तासां जीवने उन्नतिरेव अदृश्यं गता । अतः ताः असहायकाः, अशिक्षिताः, सङ्कुचितमनोवृत्तिमत्यः अभूवन् । यदा ब्रिटीष् जनानां भारते प्रवेशः अभवत् तदा तेषां मतान्तरितेषु ख्रिष्टियन् हिन्दुजनानामुपरि अत्यन्तं प्रभावो जातः । ख्रिष्टियन्महिलाः गृहीयदास्यं, निम्नस्तरीयकार्याणि दृष्ट्वा तत् विरुध्य युद्धमेव कृतवत्यः । ख्रिष्टियन्मतप्रचारकाः विद्यासंस्थाः, अनाथालयः, औषधालयम् आरब्धवन्तः । भीकरप्रवाहसन्दर्भेषु कार्यकरणम्, ख्रिष्टियन् मतं प्रति मतान्तरणम्, आर्थिकसाहाय्यम्, आवश्यककार्यप्रदानम् इत्येवं प्रारब्धवन्तः । बाल्यविवाहम्, यौतकम्, बहुपत्निविवाहम्,शिशूनां मारणम्, देवालयेषु नर्तनादिकम् कठोररूपेण निराकृतवन्तः । सामाजिकमूल्यानां पुनश्चिन्तने, जीवनस्य विषये तेषां विद्यसंस्थाः अत्यन्तम् उपकृताः । विशेषेण महिलानां स्तुतिविषये परिवर्त्तनम् आनेतुं बहुप्रयत्नं कृतवन्तः ।

१८५७ तमे वर्षे स्वातन्त्र्यसंग्रामे झान्सी राणी लक्ष्मीबायी (१८३५-१८५८) अत्यन्तं प्रेरिता सती ब्रिटीश् जनान् विरुध्य युद्धं चकार । न केवलं प्रेरिता अपि तु अन्यान् जनान् प्रेरयन्ती एव युद्धभागभागिनी मरणं प्राप्नोति । ब्रिटीश् जनानां काले समाजे बहुपरिवर्तनम् आरब्धम् । हिन्दुमहिलानाम् उन्नत्यै बहवः चिन्तकाः ईश्वरचन्द्रविद्यासगरः, महात्मागान्धी, राजा राममोहनरायः, बालगंगाधरतिलकः इत्यादयः महिलानां शिक्षणप्रदाने, बाल्यविवाहस्य निर्मूलने. पर्दापद्धतिनिवारणे, सतीप्रथा-यौतकादिविषयान् विरुध्य कार्यं चक्रुः ।

राजाराममोहनरायः (१७७४) वङ्गदेशीयः नवदशशतमानस्य पुनरूज्जीवनस्य पिता इति कथ्यते। सः सतीप्रथायाः, बहुपत्नीत्वस्य सम्प्रदायस्य विरोधम् अकरोत् । विधवानां पुनर्विवाहस्य प्रोत्साहम् अकरोत् । सः १८२८ तमे वर्षे ब्रह्मसमाजः इति संस्थां निर्मितवान् । स च आङ्ग्लभाषाध्ययनम् आदृत्य तद्वारा समाजपद्धतीः परिवर्त्तितवान् । यच्च तस्मिन् काले महिलायाः स्थितेः दारूण्यं वर्णयति । रवीन्द्रनाथ टैगोर्, स्वामी विवेकानन्दः च तस्य चिन्तनं प्रोत्साहितवन्तः ।

स्वामी दयानन्दसरस्वती गुजरातदेशीयः १८२४ तमे वर्षे महिलाभ्यः शिक्षणं, विधवानां पुनर्विवाहं च प्रतिपादितवान् । सः १८७५ तमे वर्षे मुम्बईनगरे आर्यसमाजनामकीं संस्थाम् आरब्धवान् । महादेव गोविन्द रानडे महाभागोऽपि प्रोत्साहं दत्तवान् । पण्डित रामाभायी, रामाबाई राणडे उभे अपि महिले महिलानां शिक्षाप्रदाने बहुकार्याणि कृतवत्यौ ।

तस्मिन् एव नवदशे शतमाने महाराष्ट्रदेशे महात्मा ज्योतिराव फुले, सावित्री भाई महिलासम्बन्धि पुरस्सरम् अभिवृद्धिकार्याणाम् आरम्भं चक्रतुः । प्रथमवारं १८४८ तमे वर्षे पूणे नगरे बालिकाभ्यः शालाम् आरब्धवन्तौ । पुनश्च निम्नजातीयमहिलाभ्यः बालिकाभ्यः च शिक्षणं प्रदातुं शालाः आरब्धवन्तौ १८५२ तमे वर्षे । महात्मा फुले महाभागः प्रथमं स्वस्य पत्न्यै शिक्षणं दत्तवान् । अनन्तरं सा शालासु पाठनं कर्तुम् आरब्धवती ब्रिटीश् राजस्य सन्दर्भे । इत्थं महिलासु भेदभावः नैव आसीत् । न केवलं महाराष्ट्रे, केरला, बिहारदेशेषु अपि कृषकाः कर्मकराः व्याकुलताम् आन्दोलनम् आरब्धवन्तः । तादृशेषु

आन्दोलनेषु महिलाः एव अधिकसङ्ख्यया भागम् अगृह्णन् । १९२७ तमे वर्षे महद् इति प्रदेशे कालाराममन्दिरे प्रवेशार्थम् अम्बेदकर् महाभागः बह्व्यः महिलाः च समाजे परिवर्त्तनमानेतुं विशेषेण महिलानाम् उन्नत्यर्थं महत्प्रयत्नमकार्षीत् ।

महिलानां कृते शिक्षणं तासाञ्च स्थितेः उन्नतौ च देशे बहुत्र आन्दोलनानि प्रारब्धानि । १९१७ तमे वर्षे डा.आनी बेसेण्ट् महाभागा राष्ट्रीय कान्ग्रेस् पक्षस्य नायिकारूपेण स्थानम् अलङ्कृतवती । अनन्तरं महात्मागान्धी अपि राष्ट्रीया्-अन्दोलने महिलानां कृते अवकाशं कल्पितवान् । काम्रेड् दंगे, काम्रेड् मीरजकर इत्यादयः महिलाः कर्मकाराणाम् आन्दोलने भागं गृहीतवत्यः । १९३७ तमे वर्षे डा विजयलक्ष्मी पण्डिता महाराष्ट्रस्य मुख्यसचिवत्वेन प्रमाणं स्व्यकरोत् । गान्धीमहाभागः Quit India इति आन्दोलनम् आरब्धवान् १९४२ तमे वर्षे । तत्र अरूणा असफ् अली एव मुख्या नायिका अवर्तत । एवं कर्मकराणाम् आन्दोलने वा देशस्य विभिन्नेषु राज्येषु महिलाः बह्व्यः पण्डिताः रामाभाई, डा आनन्द जोशी, डा, रखामा भाई, ताराभाई शिन्धे, रामाभाई रानडे, सोरब्जी, काशीभाई कानित्कर इत्यादयः शिक्षणस्य पुनरूज्जीवनार्थं भागं गृहीतवत्यः ।

**परिशीलितग्रन्थसूचिः**

1.मनुस्मृतिः

2.याज्ञवाल्क्यस्मृतिः

3.Bride wealth and dowry – Jack goody - 1973

4.Islam and women's income- farah debba chowdhury

5.दहेज प्रथा- एक लडाई – डा. इन्द्रजीत्

6.India's Ancient past – Ram sharan Sharma - 2004